# समासस्य प्रकारभेदाः उदाहरणानि च

Presentation By
Kousik Patra
Assistant Professor
Department of Sanskrit
Saltora Netaji Centenary College
Saltora, Bankura, West Bengal, 722158
Mobile No : 7872177720
E-mail ID: patrakousikjrf@gmail.com

समास के नियम

**समसनं समासः**

- अव्ययीभावः
- तत्पुरुषः
  - कर्मधारयः
    - द्विगुः
  - नञ्
- बहुव्रीहिः
- द्वन्द्वः

| | | |
|---|---|---|
| अव्ययीभावः | पूर्वपदप्रधानः अव्ययीभावः | अधिहरि |
| तत्पुरुषः | उत्तरपदप्रधानः तत्पुरुषः | राजपुरुषः |
| बहुव्रीहिः | अन्यपदप्रधानः बहुव्रीहिः | पीताम्बरः |
| द्वन्द्वः | उभयपदप्रधानः द्वन्द्वः | रामकृष्णौ |

| | | |
|---|---|---|
| कर्मधारय: | उपमानोपमेय: कर्मधारय: | घनश्याम: |
| द्विगु: | संख्यापूर्व: द्विगु: | पञ्चपात्रम् |
| नञ् | निषेधार्थबोधक: नञ् | असमर्थ: |
| मध्यपदलोपी | मध्यपदस्य लोप: | शाकपार्थिव: |

## अव्ययीभाव: -

पूर्वपदप्रधानोऽव्ययीभाव: ।

अर्थात् अव्ययीभावसमासे पदद्वयं भवति ।

प्रथमं पदमव्ययं तथा उत्तरपदं सुबन्तं भवति । समासे सति पदद्वयमपि अव्ययं भवति ।

| क्र. | अव्ययम् | अर्थः | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|---|
| 1 | अधि | विभक्त्यर्थे | हरौ इति | अधिहरि |
| 2 | उप | समीपे | गंगायाः समीपम् | उपगंगम् |
| 3 | सु | समृद्धौ | मद्रानां समृद्धिः | सुमद्रम् |
| 4 | दुर् | व्यृद्ध्यर्थे | यवनानां व्यृद्धिः | दुर्यवनम् |
| 5 | निर् | अभावे | विघ्नानामभावः | निर्विघ्नम् |
| 6 | अति | अत्यये | बाधायाः अत्ययः | अतिबाधम् |
| 7 | अति | असम्प्रति | क्रोधः सम्प्रति न युज्यते | अतिक्रोधम् |
| 8 | इति | शब्दप्रादुर्भावे | हरेः प्रादुर्भावः | इतिहरि |
| 9 | अनु | पश्चात् | गृहस्य पश्चात् | अनुगृहम् |
| 10 | अनु | योग्ये | रूपस्य योग्यम् | अनुरूपम् |

## कर्मधारयः -

तत्पुरुषस्य भेदः कर्मधारयः । कर्मधारयस्य भेदः द्विगुः ।

कर्मधारयसमासे पदद्वयं भवति, परम् उभयोः पदयोः लिङ्गं, वचनं, विभक्तिश्च समाना भवति । अत्र विशेष्य-विशेषणयोर्मध्ये, उपमान-उपमोययोर्मध्ये च समासः भवति । कर्मधारयः अपि सप्तविधः भवति।

| क्र. | प्रकारः | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| 1 | विशेषणपूर्वपदम् | नीलम् उत्पलम्<br>पीतम् अम्बरम् | नीलोत्पलम्<br>पीताम्बरम् |
| 2 | विशेष्यपूर्वपदम् | वैयाकरणानां खसूचिः | वैयाकरणखसूचिः<br>मयूरव्यंसकः |

| क्र. | प्रकार: | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| 3 | विशेषणोभयपदम् | पूर्वं स्नात: पश्चात् अनुलिप्त: | स्नातानुलिप्त:<br>पीतप्रतिबद्ध: |
| 4 | उपमानपूर्वपदम् | घन इव श्याम:<br>कर्पूर इव गौर: | घनश्याम:<br>कर्पूरगौर: |
| 5 | उपमानोत्तरपदम् | पुरुष: व्याघ्र इव<br>कर इव किसलय: | पुरुषव्याघ्र:<br>करकिसलय: |
| 6 | सम्भावना पूर्वपदम् | गुण इव बुद्धि:<br>आलोक इव शब्द: | गुणबुद्धि:<br>आलोकशब्द: |
| 7 | अवधारणपूर्वपदम् | विद्या एव धनम्<br>क्षमा एव शस्त्रम् | विद्याधनम्<br>क्षमाशस्त्रम् |

## तत्पुरुष:-

यस्मिन् समासे उत्तरपदं प्रधानं भवति स: तत्पुरुषसमास: ।

अत्र पदद्वयं भवति । प्रथमं पदं विविधासु विभक्तिषु भवति तथा अपरं पदं द्वतीयात: सप्तमीं पर्यन्तं भवति । अर्थात् अत्र द्वितीयान्तमारभ्य सप्तम्यल्तं यावत् पूर्वपदै: सह सुबन्त: समस्यते ।

## द्वितीयातत्पुरुष:

श्रित:, अतीत:, पतित:, गत:, अत्यस्त:, प्राप्त:, आपन्न: इत्यादिभि: सह द्वितीयान्तं पूर्वपदं समस्यते ।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| कष्टं श्रित: | कष्टश्रित: | ग्रामं गत: | ग्रामगत: |
| कालम् अतीत: | कालातीत: | संकटम् अत्यस्त: | संकटात्यस्त: |
| कूपं पतित: | कूपपतित: | सुखं प्राप्त: | सुखप्राप्त: |
| दुखम् आपन्न: | | दुखापन्न: | |

## तृतीयातत्पुरुषः

तृतीयान्त- अर्थ-कृत्-गुणवचनेन अर्थशब्देन, हीन-छिन्न-भिन्न-रहित-शून्य-युक्त-रचित-कृत्-दग्ध-हृत-विद्ध-दंष्ट्र-आवृत-प्रणीत्- आच्छन्न-सदृश-सम-पूरव-कलह-मिश्रित-सहितादिभिश्च तृतीयान्तं पूर्वपदं समस्यते। अर्थादत्रापि पदद्वयं भवति, पूर्वपदं तृतीयान्तं भवति परमुत्तरपदं प्रधानं भवति।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| शंकुलया खण्डः | शकुलाखण्डः | धान्येन अर्थः | धान्यार्थः |
| धनेन हीनः | धनहीनः | शस्त्रेण छिन्नः | शस्त्रच्छिन्नः |
| नखैः भिन्नः | नखभिन्नः | बुद्ध्या रहितः | बुद्धिरहितः |
| ज्ञानेन शून्यः | ज्ञानशून्यः | चन्दनेन युक्तः | चन्दनयुक्तः |

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
| --- | --- | --- | --- |
| पाणिनिना प्रणीतम् | पाणिनिप्रणीतम् | कालिदासेन कृतम् | कालिदासकृतम् |
| अग्निना दग्धम् | अग्निदग्धम् | चौरैः हृतम् | चौरहृतम् |
| शरेण विद्धः | शरविद्धः | सर्पेण दंष्टः | सर्पदंष्टः |
| वस्त्रेण आवृतः | वस्त्रावृतः | व्यासेन रचितम् | व्यासरचितम् |
| मेघेन आच्छन्नः | मेघाच्छन्नः | मात्रा सदृशी | मातृसदृशी |
| क्रोधेन समः | क्रोधसमः | मासेन पूर्वः | मासपूर्वः |
| वाचा कलहः | वाक्कलहः | जलेन मिश्रितः | जलमिश्रितः |
| भार्यया सदृशः | | भार्यासदृशः | |

# चतुर्थीतत्पुरुषः

तादर्थ्यार्थे बलि-हित-सुख-रक्षितादिसुबन्तपदैः सह चतुर्थन्तपदस्य समासः चतुर्थीतत्पुरुषसमासः भवति ।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| यूपाय दारुः | यूपदारुः | द्विजाय अर्थम् | द्विजार्थम् |
| काकाय बलिः | काकबलिः | गोभ्यः रक्षितम् | गोरक्षितम् |
| राष्ट्राय हितम् | राष्ट्रहितम् | पित्रे सुखम् | पितृसुखम् |

# पञ्चमीतत्पुरुषः

**पञ्चमी भयेन । अर्थात् भयादिसुबन्तपदैः सह पञ्चम्यन्तपदस्य समसनं पञ्चमीतत्पुरुषसमासः भवति**

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| चौराद् भयम् | चौरभयम् | रोगाद् मुक्तः | रोगमुक्तः |
| ग्रामाद् आगतः | ग्रामागतः | सुखाद् अपेतः | सुखापेतः |
| वृक्षात् पतितः | वृक्षपतितः | राज्यात् भ्रष्टः | राज्यभ्रष्टः |
| धर्मात् च्युतः | धर्मच्युतः | गृहात् निर्गतः | गृहनिर्गतः |

## षष्ठीतत्पुरुषः

स्वस्वामिभावादिवाचकेन षष्ठ्यन्तपदेन सह सुबन्तपदं समस्यते । अर्थात् अत्र समर्थः पदविधिः इति नियमेन सुबन्तेन सह षष्ठ्यन्तपदस्य समासः भवति ।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| राज्ञः पुरुषः | राजपुरुषः | गंगायाः जलम् | गंगाजलम् |
| ब्राह्मणस्य पुत्रः | ब्राह्मणपुत्रः | गवां शाला | गोशाला |
| सर्वेषाम् उदयः | सर्वोदयः | देशस्य रक्षा | देशरक्षा |

# सप्तमीतत्पुरुषः

सप्तमी शौण्डैः । अर्थात् शौण्ड-धूर्त्त-कितव-प्रवीण-संवीत-पटु-पण्डित-कुशल-निपुण-सिद्ध-शुष्कपक्वादिभि:सुबन्तैः सह सप्तम्यन्तं पदं समस्यते यत्र तत् सप्तमीतत्पुरुषः ।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| दाने शौण्डः | दानशौण्डः | क्रियायां धूर्तः | क्रियाधूर्तः |
| द्यूते कितवः | द्यूतकितवः | धर्मे प्रवीणः | धर्मप्रवीणः |
| रणे संवीतः | रणसंवीतः | व्यवहारे पटुः | व्यवहारपटुः |
| शास्त्रे पण्डितः | शास्त्रपण्डितः | कार्ये कुशलः | कार्यकुशलः |
| धर्मे कुशलः | धर्मकुशलः | योगे सिद्धः | योगसिद्ध |
| आतपे शुष्कः | आतपशुष्कः | स्थाल्यां पक्वः | स्थालीपक्वः |

# नञ् समास:

तत्पुरुष का भेद नञ् समास है।

जब निषेधार्थ बोध के लिए न, अन, अ पद का प्रयोग होता है तो वहां नञ् समास होता है। इसमें पूर्ववर्ण यदि व्यञ्जन होता है तो अ तथा स्वर हो तो अन का प्रयोग होता है। कदाचित् न का भी प्रयोग होता है।

| विग्रहवाक्यम् | समस्तं पदम् | विग्रहवाक्यम् | समस्तं पदम् |
|---|---|---|---|
| न शान्तिः | अशान्तिः | न समर्थः | असमर्थः |
| न शक्तम् | अशक्तम् | न लौकिकम् | अलौकिकम् |
| न आगतः | अनागतः | न आदिः | अनादिः |
| न अन्तः | अनन्तः | न ईश्वरः | अनीश्वरः |
| न आकृतिः | अनाकृतिः | न एकधा | अनेकधा |

# Reference


- https://m.facebook.com/groups/175761639431936/permalink/930547537286672/?sfnsn=wiwspwa&mibextid=VhDh1V

# धन्यवादः